International Journal of Sanskrit Research 2019; 5(5): 61-64

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(5): 61-64
© 2019 IJSR
www.anantaajournal.com
Received: 04-07-2019
Accepted: 08-08-2019

**Avula Priyanka**
Junior Researcher, EFEO, Pondicherry, India

**Correspondence**
**Avula Priyanka**
Junior Researcher, EFEO, Pondicherry, India

# व्याकरणशास्त्रस्य अध्ययनावश्यकता

**Avula Priyanka**

**प्रस्तावना**

संस्कृतभाषा न्याकरणनीयमैः रज्वा गौः इव बद्धा। अतः इयं न अभिवृद्धिं गता, जनेभ्यः दूरं गता च। सन्धयः, कारकाणि, समासाः, स्त्रीप्रत्ययाः, तद्धितप्रत्ययाः, कृत्प्रत्ययाः, सुपः, तिङ्गः, दश लकाराः, सप्तविभक्तयश्च इत्येवमादयः पर्वताः इव, महाशिलाः इव जलबन्धाः इव संस्कृतभाषाप्रवाहं निरुरुन्धुः, निरुन्धन्ति च। अतः भाषां प्रति बन्धकमेव व्याकरणम्। एतादृशं व्याकरणम् आरचय्य पाणिनिः न लोकस्य हितं चकार, प्रत्युत अहितम् एव अकरोत् इति मन्यन्ते बहवः।

किन्तु भाषातत्त्वविदः अधिगतव्याकरण – परमार्थः उपर्युक्तम् अभिप्रायं सर्वथा न अङ्गीकुर्वन्ति। यदा संस्कृतभाषा आविर्भूता, यस्मिन् समये पाणिनिः न समुत्पन्नः एव, ततः आरभ्य संस्कृतभाषायां कारकाणि दृश्यन्ते, स्त्रीप्रत्ययान्ताः अवलोक्यन्ते, तद्धितान्ताः कृदन्ता च श्रूयन्ते, समासादयः अपि कर्णपदम् आरोहन्ति। किन्तु भगवान् पाणिनिः समग्रं शद्बराशिं परिशील्य सुहृद्भूत्वा आह – षडेव कारकाणि, अष्टौ एव स्त्रीप्रत्ययाः, एकविंशतिः एव सुत्प्रत्याः अष्टादश एव तिङः, दश एव लकारः, उपद्विसहस्राः एव धातवः, स्वर – व्यञ्जन – विसर्गसन्धयः अन्ये च केचन अंशाः अस्यां भाषायां सन्ति इति। महता श्रमेण एवं विविच्य कथयितुः पाणिनेः आशयः अस्ति यत् परिगणितान् परिमितान् एतान् विषयान् स्मरन्तु, येन स्वाधीनभाषायाः सन्तः भवन्तः सिंहः इव अकुतोभयं भषारण्ये सञ्चरितुं प्रभवन्ति इति।

**अध्ययन आवश्यकता**

तस्यैतस्य व्याकरणस्य यद्यपि सन्ति बहूनि प्रयोजनानि, तथापि भाष्यकारेण पञ्च मुख्य-प्रयोजनानि निगदितानि। यथा - रक्षोहागमलध्वसन्देहाः प्रयोजनम्[1] इति। रक्षा, ऊहः, आगमः, लधु, असन्देहः इति पञ्चप्रधानानि प्रयोजनानि।

**रक्षा** - वेदानां रक्षार्थमध्येयं व्याकरणम्। यश्च लोपागमवर्णविकारादीन् यथावज्जानाति, स एव वेदान् रक्षितुं प्रभवति। अपशब्दमपस्वरं वा यः उच्चारयति तेन वेदः भ्रंशितो भवति।

[1]व्या.म.भा १.१.१

अत एवोच्यते - बिभेत्यल्पश्रुताद्वेदः मामयं प्रहरिष्यति इति। अयं मां वञ्चयिष्यतीत्यल्पज्ञं दृष्ट्वा वेदः बिभेति किल। लोके अपरिदृश्यमानं लोपविकारादिकं वेदे दृष्ट्वा अवैयाकरणः भ्राम्येत् -वैयाकरणस्तु न भ्राम्यति। यथा दुह्धातोर्लङि झ प्रत्यये तस्य अदादेशे लोपस्त आत्मनेपदेषु[2] इति त लोपे बहुलं छन्दसि[3] इति छन्दसि रुडागमे अदुह्र इति रूपं भवति। एवम् उत्पूर्वकाद् ग्रह धातोः घञ् प्रत्यये हृग्रहोर्भश्छन्दसि[4] इति वार्तिकेन हकारस्य भकारादेशे उद्ग्राभम् इति रूपं भवति। एवमादि लोपविकारादिकं वैयाकरण एव ज्ञातुं प्रभवति। अवैयाकरणस्तु ते शब्दाः असाधव इति मनुते तेनापशब्दप्रयोगं कुर्वन् वेदं भ्रंशयति। अतः साधुशब्दप्रयोगेन वेदानां रक्षार्थमध्येयं व्याकरणम्।

**ऊहः** - वेदे मन्त्राः न सर्वैः लिङ्गैः न सर्वाभिर्विभक्तिभिर्निगदिताः। यज्ञगतेन पुरुषेण यथासन्दर्भं लिङ्गपरिणामः विभक्तिविपरिणामश्च कार्यः प्रकृतिवद्विकृतिः कर्तव्या इति न्यायेन। प्रकृतियागवत् विकृतियागः कार्यः। यस्य यागस्य सम्पूर्णविधानमुच्यते, यस्य च विधानम् अन्यस्मिन् यागे उपयोक्ष्यते स प्रकृतियाग इत्युच्यते। यस्य च विधानम् असम्पूर्णमुच्यते स विकृतियाग इत्युच्यते। आग्नेययागः प्रकृतियागः। सौर्ययागः विकृतियागः। आग्नेययागे अग्नये त्वा जुष्टं निर्वपामि इति मन्त्रः पठितः। सौर्ययागे न तादृशः मन्त्रः दृश्यते। केवलं सौर्यं चरूं निर्वपेत् ब्रह्मवर्चसकाम इति पठितम्। प्रकृतिवद्विकृतिः कर्तव्या इति न्यायेन अग्नये इत्यस्य स्थाने सूर्याय इत्युक्त्वा सूर्याय त्वा जुष्टं निर्वपामि इति वक्तव्यम्। ईदृशं विपरिणामं वैयाकरण एव कर्तुं प्रभवति। तस्मात् ऊहार्थमप्यध्येयं व्याकरणम्।

**आगमः** - ब्राह्मणेन निष्कारणः षडङ्गो वेदोऽध्येयो ज्ञेयश्च इति श्रुतिः। ब्राह्मणः क्षुद्रं धनधान्यादिकं फलमनपेक्ष्यैव साङ्गं वेदमधीयीत इति तस्यार्थः। साङ्गवेदाध्ययनेनैव ब्राह्मणत्वपूर्तिः। मुखं व्याकरणं समृतम् इति न्यायेन मुखस्थानीयत्वात् व्याकरणस्य वेदाङ्गेषु प्राधान्यम्। अपि च वाक्यार्थज्ञाने प्रतिपदार्थज्ञानमावश्यकं पदपदार्थावगमः व्याकरणादेव भवति। अतः अध्येयं व्याकरणम्। यद्यपि आगमः न व्याकरणाध्ययनस्य फलं, किन्तु प्रयोजक एव। तथाप्यत्र व्युत्पत्तिभेदात् फलं प्रयोजकश्च प्रयोजनमित्यनेन गृह्यते।

**लघुः** - लघुना उपायेन शब्दप्रतिपत्त्यर्थमध्येयं व्याकरणम्। सूत्रकारैः शब्दसाधुत्वाय लक्षणान्युक्तानि लक्ष्याणि च प्रदर्शितानि। यथा - आद्गुणः[5] इति सूत्रेण उपेन्द्रः इति रूपं निष्पाद्यते, गङ्गोदकमित्यादीनां रूपाणां साधुत्वमवगम्यते। अपि च सलक्षणं रामशब्दे निष्पादिते अकारान्ताः सर्वे शब्दाः एवमेवेति ज्ञायते। एवं लक्ष्यलक्षणविधानेन लघुना उपायेन साधुशब्दप्रतिपत्तिर्भवति। अत एव भाष्यकारेण - कथं तर्हि शब्दाः प्रतिपत्तव्याः इति प्रश्नं कृत्वा किञ्चित्सामान्यविशेषवल्लक्षणं प्रवर्त्यम्। येनाल्पेन यत्नेन महतो महतः शब्दौघान् प्रतिपद्येरन्। किं पुनस्तत्। उत्सर्गापवादौ। कश्चिदुत्सर्गः कर्तव्यः कश्चिदपवादः। सामान्येनोत्सर्गः विशेषेणापवाद इत्युक्तम्। अतः लघ्वर्थमप्यध्येयं व्याकरणम्। ब्राह्मणानां खल्वध्यापनं वृत्तिः। यश्च व्याकरणज्ञः साधु बोधयति, तमुपश्लिष्यन्ति छात्राः। अन्यथा तं त्यजन्ति।

**असन्देहः** - असन्देहार्थमध्येयं व्याकरणम्। सति सन्देहे प्रवृत्तिरेव दुर्लभा। याज्ञे कर्मणि याज्ञिकाः पठन्ति स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेत इति। स्थूलपृषतीं गाम् अग्निवरुणावुद्दिश्य आलम्भनीयेति तस्यार्थः। तत्र स्थूलपृषती शब्दे स्थूला चासौ पृषती च इति कर्मधारयः, उत स्थूलानि पृषन्ति यस्या इति बहुव्रीहिः इति सन्देहो जायते। कर्मधारये गोः स्थौल्यं प्रतीयते। बहुव्रीहौ बिन्दूनां स्थौल्यं प्रतीयते। यदि पूर्वपदप्रकृतिस्वरः तर्हि बहुव्रीहिः यदि अन्तोदात्तस्तर्हि कर्मधारय इति वैयाकरणः स्वरतः समासं निश्चिनोति। अतः तस्य सन्देह एव न जायते। अत्र असन्देहशब्देन सन्देहस्य प्रागभाव एव विवक्षितः। न तु प्रध्वंसाभावः। अवयैयाकरणस्य तु सन्देहो जायते। तेन तस्य कर्मणि प्रवृत्तिरेव न स्यात्। प्रवृत्तेऽपि कर्मणि शब्ददोषेण क्रियादोषेण वा अनर्थः स्यात्। अतः असन्देहार्थमध्येयं व्याकरणमिति। व्याकरणाध्ययनस्य पञ्च-प्रयोजनानि निरूपितानि। तानि च प्रधानानि प्रयोजनानि भाष्यकारेण रक्षोहागम-लघ्वसन्देहाः प्रयोजनम् इति वार्तिकेन संगृहीतानि। श्रीमता भास्कराचार्येणाऽप्युक्तम् -

> यो वेद वेदवदनं सदनं हि सम्यक् ब्राह्म्याः स वेदमपि वेद किमन्यशास्त्रम्।
> यस्मादतः प्रथममेतदधीत्य धीमान् शास्त्रान्तरेषु भवति श्रवणेऽधिकारी।।

भाषैव मानवसामाजस्याभिप्रायाणां परस्परं व्यक्तीकरणस्य मुख्यं साधनं वर्तते। भाषाणां संस्कारकरणार्थं व्याकरणशास्त्रस्याध्ययनं परमावश्यकम्।

---

[2] पा.सू.७.१.४१

[3] पा.सू.७.१.८

[4] वा. ४८२३

[5] पा.सू.६·१·८४

रूसी-जर्मन-फ्रेञ्च-स्पेनिश-आङ्ग्लप्रभृतीनां विदेशीयभाषाणां तुलनात्मकाध्ययनार्थञ्च संस्कृतव्याकरण-शास्त्रस्य तत्तद्भाषास्थव्याकरणशास्त्रस्य चाध्ययनमावश्यकम्। यतोहि सर्वासु विदेशीय-भाषासु संस्कृतशब्दानामेव मूलं दृश्यते।

संस्कृतभाषायां विविधानां शिल्पसङ्गीतनृत्यवादित्रचित्रकलानां भौतिक-रसायन-जीव-वनस्पति-ज्योतिर्विज्ञानप्रभृतीनां विषयाणां विविधाः ग्रन्थाः वर्तन्ते। तेषां सम्यक् अध्ययनं विधाय, तदनुकूलव्यवहारेण मानवसमाजस्यातीवोपकारो भवितुमर्हति। एतत् व्याकरणज्ञानमन्तरेण पदपदार्थप्रकृतिप्रत्ययज्ञानाभावात् न सम्भाव्यते। अतः अध्येयं व्याकरणम्। संस्कृतभाषायां मनुष्यपशुपक्षिवृक्षवनस्पतीनां चिकित्साविज्ञानस्य बहवो ग्रन्थाः वर्तन्ते। आधुनिकविविध-चिकित्साविज्ञानान्यपि आयुर्वेदमूलकान्येव, तद्विकासार्थमध्येयं व्याकरणम्। नानाविधयन्त्रादि-निर्माणविज्ञान-जलविज्ञान-वायु-विज्ञान-भूगर्भविज्ञान-अन्तरिक्षविज्ञान-वास्तुविज्ञान-नानाविध-यानविमानविज्ञानमूलकाः ग्रन्थविशेषाः संस्कृतभाषायामेव वर्तन्ते। तेषामध्ययनार्थमनुसन्धानार्थं च व्याकरणशास्त्र-ज्ञानमावश्यकम्। तस्मादध्येयं व्याकरणम्।

इतिहासभूगोलकृषिशास्त्रोद्यानविद्याधनुर्विज्ञानयुद्धविज्ञानप्रभृतीनां महत्वपूर्णविषयाणां विविधाः ग्रन्थाः, किञ्च आन्वीक्षिक्यादय अष्टादशविद्याः, षोडशकलाश्च, संस्कृत-भाषायामेव वर्तन्ते। अतः तेषां गूढज्ञानार्थं व्याकरणशास्त्रज्ञानमावश्यकम्। अत अस्मिन्नाधुनिके वैज्ञानिकयुगेऽपि व्याकरणशास्त्राध्ययनं महत्त्वपूर्णमिति न तिरोहितं विदुषाम्। तस्मादध्येयं व्याकरणम्।

ननु वैयाकरणाः साधुशब्देष्विव गोणी, गोता, गोपोतोलिका प्रभृतिष्वसाधुशब्देष्वपि अर्थबोधकता शक्तिं स्वीकुर्वन्ति। यदा असाधुशब्देभ्योऽपि अर्थ अवगन्तुं शक्यते, तर्हि किं व्याकरणाध्ययनेन? इति शङ्कायां महाभाष्ये भगवता पतञ्जलिना – समानायामर्था-वगतौ शब्देन चापशब्देन शास्त्रेण धर्मनियम इति लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः [6] इति चाभिधाय साधुशब्देनैवार्थज्ञाने पुण्यं भवति, न अपशब्देनार्थज्ञानम् इति स्वीकृतम्। अत्र एकः शब्दः सम्यग् ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवतीति शास्त्रोक्तिरपि सङ्गच्छते। एवं साधुत्वासाधुत्वज्ञानार्थं पुण्यलाभार्थञ्च व्याकरणशास्त्राध्ययनमावश्यकम्। अत एव दण्ड्यपि - यद्यपि बहुनाधीषे तथापि पठ पुत्र व्याकरणम्, स्वजनः श्वजनो माभूत्[7] इति उपदिदेश। किं बहुना। व्याकरणज्ञानमन्तरेण वेदानामर्थो ज्ञातुं न शक्यते। अतः वेदबोधितेष्टसाधनताकं कर्म कुर्वद्भिरपि जनैर्न तत्फलं प्राप्यते। तथा च ऋग्वेदे समाम्नायते -

> स्थाणुरयं भारहारः किलाऽभूदधीत्य वेदं न विजानाति योऽर्थम्।
> योऽर्थज्ञ इत् सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा[8]।।

व्याकरणशास्त्रमायुर्वेद इव वाङ्मलानां चिकित्सकः, सर्वविद्यादृतः, सर्वविद्यापवित्रः सन् मोक्षाख्यपरमपुरुषार्थप्राप्तये एकः सरलः पन्थाः। लोके सर्वाः विद्याः शब्दैर्निबद्धाः, अतः सर्वासां विद्यानां शक्तिग्राहकं सत् व्याकरणं वेदज्ञानद्वारा मोक्षस्य द्वारं भवति। किञ्चेदं मोक्षं कामयमानानां कृते सिद्धिसोपानपर्वणामाद्यं पदस्थानम्, अकुटिलो राज-मार्गश्च, ततश्च ब्रह्मसाक्षात्कारो जायते। तथा चोक्तं श्रीहरिणा –

> तदद्वारमपवर्गस्य वाङ्मलानां चिकित्सिकम्।
> पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते।।
> यथार्थजातयः सर्वाः शब्दाकृतिनिबन्धनाः।
> तथैव लोके विद्यानामेषा विद्या परायणम्[9]।।
> इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्।
> इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः [10]।।

## उपसंहारः

अतः पाणिनिना किमपि अपराद्धं, प्रत्युत सर्वं विविच्य सङ्ग्रहेण निरूपयता तेन महान् अनुग्रहः एव कृतः। वयम् अल्पमतयः व्याकरणं किंञ्चित् एव अधीत्य, अपेक्षानुगुणं किमपि परिवर्तनं कर्तुम् उद्युक्ताः पाणिनिनियमस्य विरोधं दृष्ट्वा पाणिनिं प्रतिबन्धकं मन्यामहे। यदि व्याकरणम् अधिकं ज्ञातं भवेत् तर्हि अपेक्षापूरणार्थं तत्र स्थितान् अनेकान् मार्गान् दृष्ट्वा आश्चर्यचकिताः स्याम। किन्तु अधिकं परिश्रमं कर्तुम्, अधिकं समयं यापयितुं वा नास्ति अस्माकं समयः न वा इच्छा। स्वयम् अन्धाः सन्तः दर्पणे प्रतिबिम्बन – असामर्थ्यम् आरोपयन्तः स्मः वयम्।

## उपयुक्तग्रन्थसूचि

1. अष्टाध्यायी, पाणिनिः, श्रीशान्तिस्वरूपकपूरः, श्रीरामलाल् कपूर् ट्रस्ट प्रेस्, बहालगढ, हरियाणा, १९८५

[6] व्या.म.भा.१.१.१

[7] सु.र.भा.१.पृ.४

[8] ऋ. ८.२.२३.४

[9] वा. ब्र

[10] वा. ब्र .१४-१६

2. अमरकोशः (रामाश्रमीव्याख्योपेतः), अमरसिंहः, शिवदत्तदाधिमथः, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, १९७०
3. भट्टोजिदीक्षितेन नागेशभट्टेन च प्रतिपादितानां केषाञ्चन वैयाकरण-सिद्धान्तानां तुलनात्मकमध्ययनम्, डा सुरेन्द्र झा, नाग पब्लिषर्स, दिल्ली, १९९८
4. वाक्यपदीयम्, भर्तृहरिः, रघुनाथशर्मा, पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, १९८०.
5. व्याकरणमहाभाष्यम्, पतञ्जलिः, शिवदत्तशर्मा, चौखम्बा विद्याभवन्, वाराणसी, १९८८.
6. व्याकरणशास्त्रेतिहासः, लोकमणिदाहलः, भारतीयविद्या-प्रकाशनम्, वाराणसी.